श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये षष्टितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये षष्टितमं दशकम् ॥

## गोपीवस्त्रापहरणवर्णनम्

मदनातुरचेतसोऽन्वहं
    भवदङ्घ्रिद्वयदास्यकाम्यया।
यमुनातटसीम्नि सैकतीं
    तरलाक्ष्यो गिरिजां समार्चिचन् ॥ **60.1** ॥

तव नामकथारताः समं
    सुदृशः प्रातरुपागता नदीम्।
उपहारशतैरपूजयन्
    दयितो नन्दसुतो भवेदिति ॥ **60.2** ॥

इति मासमुपाहितव्रता -
    स्तरलाक्षीरभिवीक्ष्य ता भवान्।
करुणामृदुलो नदीतटं
    समयासीत्तदनुग्रहेच्छया ॥ **60.3** ॥

नियमावसितौ निजाम्बरं
    तटसीमन्यवमुच्य तास्तदा।
यमुनाजलखेलनाकुलाः
    पुरतस्त्वामवलोक्य लज्जिताः ॥ **60.4** ॥

त्रपया नमिताननास्वथो
    वनितास्वम्बरजालमन्तिके।

निहितं परिगृह्य भूरुहो
    विटपं त्वं तरसाऽधिरूढवान्॥ **60.5**॥

इह तावदुपेत्य नीयतां
    वसनं वः सुदृशो यथायथम्।
इति नर्ममृदुस्मिते त्वयि
    ब्रुवति व्यामुमुहे वधूजनैः॥ **60.6**॥

अयि जीव चिरं किशोर न -
    स्तव दासीरवशीकरोषि किम्।
प्रदिशाम्बरमम्बुजेक्षणे -
    त्युदितस्त्वं स्मितमेव दत्तवान्॥ **60.7**॥

अधिरुह्य तटं कृताञ्जलीः
    परिशुद्धाः स्वगतीर्निरीक्ष्य ताः।
वसनान्यखिलान्यनुग्रहं
    पुनरेवं गिरमप्यदा मुदा॥ **60.8**॥

विदितं ननु वो मनीषितं
    वदितारस्त्विह योग्यमुत्तरम्।
यमुनापुलिने सचन्द्रिकाः
    क्षणदा इत्यबलास्त्वमूचिवान्॥ **60.9**॥

उपकर्ण्य भवन्मुखच्युतं
    मधुनिष्यन्दि वचो मृगीदृशः।
प्रणयादयि वीक्ष्य वीक्ष्य ते
    वदनाब्जं शनकैर्गृहं गताः॥ **60.10**॥

इति नन्वनुगृह्य वल्लवी -
    र्विपिनान्तेषु पुरेव सञ्चरन्।

करुणाशिशिरो हरे हर
    त्वरया मे सकलामयावलिम् ॥ **60.11** ॥

॥ इति श्रीमन्नारायणीये षष्टितमं दशकं समाप्तम् ॥